# समूहस्य दर्पणं – ब्राह्मणसाहित्यम्।

Dr. Saritha Maheswaran
Asst. Professor, Govt. Sanskrit College, Thrippunithura

Submitted on: 15/09/2020 Revised on: 28/09/2020 Accepted on: 30/09/2020

ब्राह्मणग्रन्थाः वेदानां व्याख्यानरूपाः यज्ञविधायकाश्च भवन्ति। चतुर्णामपिवेदानां प्रत्येकं ब्राह्मणानि सन्ति । ऐतरेयकौषीतक्यावेव ऋग्वेदस्य ब्राह्मणग्रन्थाविति प्रसिद्धिः। तावेवाद्योपलभ्येते इत्यर्थः।शाकलबाष्कलादिसंहितानामनुजातानि संहृत्य एकविंशति ब्राह्मणानि आसन्निति श्रूयते। पैङ्गीबह्वृचाश्वलायनशालवप्रभृतीनि ब्राह्मणानि नष्टानीति मन्यन्ते।

क्रिस्तोःपूर्वं सहस्रशतकादारभ्य (1000बिसि) षष्ठशतकपर्यन्तकाल एव ब्राह्मणग्रन्थनां रचनासमाहरणकाल इति वैदिकचरित्रकाराणामभिप्रायः । सर्वेषु ब्राह्मणेषु प्राचीनतमं भवति ऐतरेयम्। निरुक्तकारेण यास्केन, भगवता पाणिना च परामृष्टोऽयं ग्रन्थः इत्यनेनास्य ब्राह्मणस्य पौराणिकता आधिकारिकता च व्यक्तमेव।

वैदिकविद्याप्रदानं वाचा एव प्रवर्तितमासीत् । पुनःपुनरनुशीलनेन श्रवणेन च विद्यार्थिनः वेदज्ञाः भवन्ति । तादृशहृदिस्थकरणसंप्रादयस्यापि चरित्रदृशा प्राधान्यमस्ति। लेखनसंप्रदायस्याभावेऽपि वर्णपदवाक्यादीनां सम्यक् ज्ञानं स्फुटोच्चारणेन जायत इति वैदिकसंस्कृतिरेव सूच्यते । सर्वे ग्रन्थाः तद्विरचितकालस्य सामूह्यव्यवस्थां सामान्यतया प्रतिपादयन्ति। वैदिकग्रन्थेषु ब्राह्मणाः अपि न व्यतिरिक्ताः। चातुर्वर्ण्यसङ्कल्पं, विद्याभ्यासरीतयः, स्त्रियः, तासां व्यापाराणि, जनानां जीवनप्रकारः, भोजनप्रकाराः, इत्यादि विविधविषयानवलंब्य सुबहु ज्ञातुं ग्रन्थातल्लजानि स्वीकृतानि।

**ऋग्वेदब्राह्मणानि समूहव्यवस्थितिश्च – चातुर्वर्ण्यम्।**

मानषेषु ब्राह्मणक्षत्रियवैश्यशूद्राः चत्वारि वर्णानि इति प्रसिद्धिः । तेषु ब्राह्मणः सर्वश्रेष्ठः। तेषामुत्तरोत्तरमवद्यत्वं संभवतीति ब्राह्मणग्रन्थाःप्रतिपादयन्ति। न केवलं मानवेषु किन्तु देवगणेष्वपि वर्णभेदो अवर्तत इति ऐतरेयं विशदयति। बृहस्पतिः, अग्निश्च ब्राह्मणदेवौ। इन्द्रः, वरुणः, सोमः, रुद्रःइत्येते क्षत्रियाःभवन्ति। अष्टवसवः, आदित्याः वैश्यदेवाः। सस्यलतादिषु पशुपक्षिष्वपि च वर्णव्यवस्था स्वीकृता आसीदिति ब्राह्मणानि सूचयन्ति।

**ब्राह्मणाः**

दानग्रहणं, सोमरसपानं यथेष्टगमनं यदृच्छानुसारं राज्ञः आज्ञानुवर्तित्वमित्येतानि ब्राह्मणस्य धर्माणि। राज्यस्य परमाधिकारिणः चक्रवर्तिनः मार्गनिदेशको आसीत् ब्राह्मणः। एकस्मिन् राज्ये राजाश्रितऽपि ब्राह्मणः क्षत्रियस्योपरि पदवीमलंचकार। ब्राह्मणो न दण्ड्यः तस्य वधो ब्रह्महत्यापापकारणाय च भविष्यतीति चिन्ता ब्राह्मणकाले आसीत् । ब्रह्महत्यापापं जन्मान्तरेऽपि व्याप्नोति । अतः तेषां संरक्षणमेव राज्ञां कार्यमिति ब्राह्मणान्युद्घोषयन्ति। ब्राह्मणं पुरस्कृत्य यो राजा राज्यपरिपालनं करोति तस्मिन् राज्ये सर्वसंपद्समृद्धिरुपजायते इति विश्वासः अवर्धत ।राज्ञां पट्टाभिषेकवेलायां पुरोहितस्य नामगोत्रादीनां घोषणमपि कुर्यादिति ऐतरेयब्राह्मणं व्यनक्ति। महाभिषेकमिति स्थानारोहणस्यास्य नाम । पुरोहितं न द्रुह्याद् इति नियतिश्चासीत् । यदि तन्निन्द्यं कर्म करोति तर्हि यावत्पर्यन्तं जीवेयं तावद्पर्यन्तं मम निखिलसम्पद्समृद्धयः पुरोहितस्य हस्ते अर्पयामीति राजा स्थानारोहणमुहूर्ते प्रतिज्ञां करोति ।

**क्षत्रियाः**

चातुर्वर्ण्यव्यवस्थायां ब्राह्मणस्य सहवर्तित्वं क्षत्रियाणामस्ति। क्षत्रियः ओजोगुणस्य वीर्यस्य च प्रतीकं भवति । ओजःक्षत्रं वीर्यं राजन्यः इति ऐतरेयब्राह्मणे उक्तम् । ब्राह्मणवद् क्षत्रियाः अपि उपनीयते । वेदाध्ययनं क्रियन्ते । यजनं याजनञ्च ब्राह्मणस्य धर्म किन्तु क्षत्रियस्य केवलं याजनमेवासीत् । हव्यशेषभुक्तिस्तु केवलं ब्राह्मणस्य एव ।अतः हुताद इति नाम च ब्राह्मणस्य लब्धमासीत् ।

**वैश्याः**

कृषिवाणिज्यादयः वैश्यस्य धर्माण्यासन् । शूद्रेभ्योपरि आसीत्तेषां स्थानमपि न सर्वतो भद्रमिति वक्तुं शक्यते वैश्यानामवस्थामवस्थानम्। ब्राह्मणक्षत्रियाभ्यां सुदूरमासीत् वैश्यानां समूहे स्थितिः। विशः इति पदस्य प्रजाः अथवा पौराः इत्यर्थो ददाति ऐतरेयब्राह्मणम् । वैश्यस्य शूद्रस्य च स्थानं समानमेवासीदिति ऐतरेयकारस्य मतम् ।

**शूद्राः**

शूद्राणामवस्था अतिदयनीया आसीत् ।चातुर्वर्ण्ये तेषां स्थितिरन्तिमस्थानेऽभवत्। ब्राह्मणैः साकं शूद्राः नोपविशेयुरिति वदति ऐतरेयब्राह्मणम् । शूद्राः ब्राह्मणानां दृष्टिगोचरा न भवेयुरिति कल्पना चासीत् ।अतः ब्राह्मणक्षत्रियाणां सेवनैकनिरततया शूद्राणां जीवनं दुःसहमासीदिति ज्ञातुं शक्यते ।

**नीचजातयः**

वैदिकवर्णव्यवस्थातो बाह्यः जनः नीचजातिरिति ज्ञायते स्म । ते प्रसिद्धचतुर्वर्णभ्यो बाह्याःइति प्रसिद्धिः। महर्षेः विश्वामित्रस्य पुत्राः दस्युरिति नाम्नि नीचजातौ जाता इत्येका प्रसिद्धा कथा ऐतरेये वर्णिता द्रष्टुं शक्यते । ते पुत्राः विश्वामित्रस्य वाचोऽतिक्रम्य गता अतः ते पितुः शापेन दस्यवः संजाता इति ज्ञायते । ते आन्ध्रापुलिन्दशबरपुण्ड्रादिषु जातिषु विश्वामित्रस्य शापेन जाताः। ब्राह्मणानां परिहासपात्राण्यासन् नीचजातयः। किन्तु विशेषज्ञानयुक्ताः पुरुषाः तैरेव ब्राह्मणादिभिः बह्वमन्यन्त च ।

दासीपुत्रस्य कवषस्य कथा ऐतरेयब्राह्मणे एवं सूच्यते – इलूष इति नामान्तरेण युक्तःकवषः दासीपुत्रः आसीत्। मातुः प्रियपुत्रः सः पितरमधिकृत्य अज्ञः अवर्तत।किन्तु गुरुप्रसादेन सः मन्त्रद्रष्ट्रा विज्ञानी चाभवत् । सरस्वतीनदीतीरवासिभिर्महर्षिभिः क्वचित् यागमध्ये आगतः कवषः यागशालातः बहिष्कृतः। किन्तु तेन योगदृष्ट्या सर्वमज्ञायि । सरस्वतीनदी स्वयं तस्य समीपमागतवतीति च कथा । ऋषयः पश्चात्तापविशाः अभूवन् । अयमेव कथाभागः कौषीतकीब्राह्मणेऽपि द्रष्टुं शक्यते । यागशालायाः परित्यक्तः कवषः सरस्वतीमन्त्रमालपन् नदीं प्रीणाति स्मेति कौषीतकी परामृशति। तेन सः ऋषिभिर्नुतोऽभूद्। अत्र ब्राह्मणद्वयेपि सरस्वत्याः प्रसादमधिकृत्य वर्णितं दृश्यते। तन्न केवलं नदीरूपिण्याः सरस्वत्याः प्रसादं, किन्तु तस्मै ज्ञानरूपिणी सरस्वती प्रत्यक्षाभूदिति मन्तव्यम्।

ऐतरेयमहीदासः ऐतरेयब्राह्मणस्य कर्तेति ज्ञायते। स तु इतरायाःपुत्र आसीत्। अर्थात् सः तस्य पितुः द्वितीयभार्यायाः( सैव इतरा ) पुत्र आसीत्। इतरा अप्रधाना चासीत्। महीदासः इति नाम्ना एव तस्य शूद्रकुलत्वं सूच्यते यत् दासदत्तादीनि नामानि शूद्रैरुपयुक्तानि। तथापि सः विज्ञः आसीत्। पश्चात् सः वैमातृसोदरैरङ्गीकृतश्च ।स्वधर्माचरणं विज्ञानञ्च आदरस्थानमेव भवतीति कथायाःगुणपाठः।

**ब्रह्मचर्यं विद्याभ्यासञ्च।**

बालानामुपनयनादारभ्य वेदानुशीलनस्यारंभः ब्राह्मणकालेऽपि सञ्जातः। वेदपठनकालात् तस्य ब्रह्मचर्यव्रतस्यारंभः। ब्रह्मचारिणः विद्याविषयमधिकृत्य च ब्राह्मणग्रन्थेषु व्याकृतमस्ति। । मन्त्रब्राह्मणारण्यकोपनिषद्वेदवेदाङ्गादयः विद्याः आसन् । मनुजानामाशंसागीतयः नाराशंसीगाथाश्च पठितमासीदिति वर्ण्यते । पठनविषयाणां वैशद्येन प्रतिपादनमस्त्यपि कया रीत्या विद्याभ्यासमकरोदिति ग्रन्थेषु न सूचितम् । तर्कप्रत्युक्तिभिरासन्निति मन्यते।मनुपुत्रः नाभोनेदिष्ठः ब्रह्मचर्यं स्वीकृतमति ऐतरेये सूच्यते। ऋषयोऽङ्गिरसस्तस्मै नाभोनेदिष्ठाय यज्ञभूमावविशिष्टान् धनधान्यगवादीनदादिति वर्णितम्। दीर्घब्रह्मचर्यं विद्याभ्यासश्च तस्मिन् काले वृतमासीदिति ब्राह्मणेभ्यो ज्ञातुं शक्यते।

**स्त्रीणां विद्याभ्यासः**

ब्राह्मणेषु स्त्रीणां विद्याभ्यासस्य निषेधः न कुत्रापि वर्णितः। घोषा, अपाला, विश्ववारा, लोपामुद्रा, रोमशा इत्येताः स्त्रियः मन्त्रद्रष्टारःविद्यासंपन्नाश्चासन्निति व्यक्तमेव ।पौरोहित्यम्।

जनमध्ये पुरोहितस्य उन्नतं स्थानमासीदिति ऐतरेयं सूचयति। देवाराधनराजशासनादि विषयेषु राज्यस्य राष्ट्रीयसंपदिकविषयेषु च पुरोहितस्य स्वाधीनमासीत् । राजप्रासादेषु पुरोहिताः बहवः आसन्नपि राज्ञः मुख्योपदेष्टा तेषु प्रमुखोऽवर्तत। पुरोहितमृते यागानुष्ठानो न कर्तव्य इति ऐतरेयमनुशासति। न ह वा अपुरोहितस्य राज्ञो देवमन्नमदन्ति तस्माद्राजा यक्ष्यमाणो ब्राह्मणं पुरोदधीत इति। यागानुष्ठाने दक्षिणायाश्च प्राधान्यमस्ति। राज्याभिषेकवेलायां राजानः पुरोहितेभ्यःमहत्तरां दक्षिणामदादिति ऐतरेयब्राह्मणं सूचयति।

विवाहम् ।

विवाहं षोडशकर्मस्वेकमिति वैदिकमतम्। अभ्यस्तविद्यः पुमान् जीवनपरिपूर्त्यर्थं गर्हिकजीवितं प्रविशति। तस्माद् पुरुषो जायां लब्ध्वा एव कृत्स्नमिवात्मानं मन्यते। यागानुष्ठाने यजमानेन साकं पत्नी च भवितव्यमास्ति। सखा ह जाया इति वाक्येन ऐतरेयं भार्यायाः सुहृत्स्थानमप्युद्घोषयति। पुरुषः मनश्चेत् स्त्री वाक् भवति।भर्तुः समीपं सदा पत्नी वसति। इत्यादयः भावनाः ऐतरेयस्य वैशिष्ट्यानीति वक्तुं शक्यते।

बहुभिरनुबन्धैरनेकैः पञ्चिकाभिश्चोपेतौ कौषीतकी-ऐतरेयब्रह्मणौ समूहस्य दर्पणमिव वर्तेते। द्वावपि ग्रन्थौ भारतीयविज्ञानपरंपरासु अद्वितीयस्थानमावहतश्च।

## सहायकग्रन्थाः


1. Aitareya Brahmana with vritti Sukhaprada of Shadgurusishya Ed. R Ananthakrishna Sastri, University of Travancore, Trivandrum 1962.
2 Rigveda Brahmanas : the Aitareya and Kaushitaki Brahmanas of the Rigveda, Ed. A B Keith, Motilal Banarsidass Delhi 1920
3 Anadi -Portion 1 Vaidikam 1 (Collections of Essays on Vedic Literature), Ed. Dr.K A Ravindran, National Book Stall Kottayam 2011.
4 Brahmanangal – Oru Padhanam Dr. N K Sundareswaran, Panchangam Publishers Kunnamkulam, 2011